# .. Praise of Sanskrit Language ..

## ॥ સંસ્કૃતાષ્ટકમ્ ॥

### Document Information

Text title : amarasa.nvaada Sanskrit Arati translated from Marathi

File name : sanskrit8.itx

Category : arati

Location : doc_z_misc_general

Author : Vasant Shankar Nanivadekar

Language : Sanskrit

Subject : kaavya/religion

Transliterated by : N

Proofread by : N

Latest update : October 8, 2001

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ સંસ્કૃતાષ્ટકમ્ ॥

અગ્રતઃ સંસ્કૃતં મેઽસ્તુ પૃષ્ઠતો મેઽસ્તુ સંસ્કૃતમ્ ।
સંસ્કૃતં હૃદયે મેઽસ્તુ વિશ્વમધ્યેઽસ્તુ સંસ્કૃતમ્ ॥ ૧॥

સંસ્કૃતં દેવભાષાઽસ્તિ વેદભાષાઽસ્તિ સંસ્કૃતમ્ ।
પ્રાચીન-જ્ઞાન-ભાષા ચ સંસ્કૃતં ભદ્રમણ્ડનમ્ ॥ ૨॥

વેદાન્તાનાં પુરાણાનાં શાસ્ત્રાણાં ચ તથૈવ ચ ।
મંત્રાણાં તંત્રસૂત્રાણામ્ આદ્યભાષાઽસ્તિ સંસ્કૃતમ્ ॥ ૩ ॥

રામાયણં મહાકાવ્યં મહાભારતમેવ ચ ।
ઉભે ચ વિશ્વવિખ્યાતે સંસ્કૃતસ્ય મહાનિધી ॥ ૪॥

ભાસસ્ય કાલિદાસસ્ય ભવભૂતેશ્ચ વિશ્રુતા ।
બાણ-શૂદ્રક-હર્ષાણામ્ કાવ્યભાષાઽસ્તિ સંસ્કૃતમ્ ॥ ૫॥

પ્રાણભૂતં ચ યત્તત્વં સારભૂતં તથૈવ ચ ।
સંસ્કૃતૌ ભારતસ્યાઽસ્ય તન્મે યચ્છતુ સંસ્કૃતમ્ ॥ ૬॥

યત્ર રામકથાગાનમ્ તત્રાઽસ્તે હનુમાન્ યથા ।
સંસ્કૃતાધ્યયનં યત્ર તત્ર સંસ્કૃતિદર્શનમ્ ॥ ૭॥

શૃણુમઃ સંસ્કૃતં નિત્યં વદામઃ સંસ્કૃતં તથા ।
સ્મરામઃ સંસ્કૃતં નિત્યં પઠામઃ સંસ્કૃતં તથા ॥ ૮॥

---

રચનાકારઃ વસન્તઃ શંકરસુતઃ નાનિવડેકરઃ ।
Composed by Mr. Vasant Shankar Nanivadekar
Mr. V. S. Nanivadekar
1/18 Goregaonkar Chawl,
Near Central Cinema,
Girgaon, Mumbai 400004 India

.. Praise of Sanskrit Language ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*